अन्न मेवै वान्न मन्न मेव दक्षिणतो दक्षिणत एवान्न मन्न मेव दक्षिणतः ।

(26)[P13] 5.3.3.3(19)– एव । दक्षिणतः । धत्ते ।

एव दक्षिणतो दक्षिणत एवैव दक्षिणतो धत्ते धत्ते दक्षिणत एवैव दक्षिणतो धत्ते ।

(27)[P13] 5.3.3.3(20)– दक्षिणतः । धत्ते । तस्मात् ।

दक्षिणतो धत्ते धत्ते दक्षिणतो दक्षिणतो धत्ते तस्मात् तस्माद् धत्ते दक्षिणतो दक्षिणतो धत्ते तस्मात् ।

(28)[P13] 5.3.3.3(21)– धत्ते । तस्मात् । दक्षिणेन ।

धत्ते तस्मात् तस्माद् धत्ते धत्ते तस्माद् दक्षिणेन दक्षिणेन तस्माद् धत्ते धत्ते तस्माद् दक्षिणेन ।

(29)[P13] 5.3.3.3(22)– तस्मात् । दक्षिणेन । अन्नम् ।

तस्माद् दक्षिणेन दक्षिणेन तस्मात् तस्माद् दक्षिणे नान्न मन्नम् दक्षिणेन तस्मात् तस्माद् दक्षिणे नान्नम् ।

(30)[P13] 5.3.3.3(23)– दक्षिणेन । अन्नम् । अद्यते ।

दक्षिणे नान्न मन्नम् दक्षिणेन दक्षिणे नान्न मद्यते ऽद्यते ऽन्नम् दक्षिणेन दक्षिणे नान्न मद्यते ।

(31)[P13] 5.3.3.3(24)– अन्नम् । अद्यते । वर्चः ।

अन्न मद्यते ऽद्यते ऽन्न मन्न मद्यते वर्चो वर्चो ऽद्यते ऽन्न मन्न मद्यते वर्चः ।

(32)[P13] 5.3.3.3(25)– अद्यते । वर्चः । द्वावि(ग्म्)शः ।

अद्यते वर्चो वर्चो ऽद्यते ऽद्यते वर्चो द्वावि(ग्म्)शो द्वावि(ग्म्)शो वर्चो ऽद्यते ऽद्यते वर्चो द्वावि(ग्म्)शः ।

(33)[P13] 5.3.3.3(26)– वर्चः । द्वावि(ग्म्)शः । इति ।

वर्चो द्वावि(ग्म्)शो द्वावि(ग्म्)शो वर्चो वर्चो द्वावि(ग्म्)श इतीति द्वावि(ग्म्)शो वर्चो वर्चो द्वावि(ग्म्)श इति ।

(34)[P13] 5.3.3.3(27)– द्वावि(ग्म्)शः । इति । पश्चात् ।

द्वावि(ग्म्)श इतीति द्वावि(ग्म्)शो द्वावि(ग्म्)श इति पश्चात् पश्चादिति द्वावि(ग्म्)शो द्वावि(ग्म्)श इति पश्चात् ।

(35)[P13] 5.3.3.3(28)– इति । पश्चात् । यत् ।

इति पश्चात् पश्चा दितीति पश्चाद् यद् यत् पश्चा दितीति पश्चाद् यत् ।

(36)[P13] 5.3.3.3(29)– पश्चात् । यत् । वि(ग्म्)शतिः ।

पश्चाद् यद् यत् पश्चात् पश्चाद् यद् वि(ग्म्)शतिर् वि(ग्म्)शतिर् यत् पश्चात् पश्चाद् यद् वि(ग्म्)शतिः ।

(37)[P13] 5.3.3.3(30)– यत् । वि(ग्म्)शतिः । द्वे ।

यद् वि(ग्म्)शतिर् वि(ग्म्)शतिर् यद् यद् वि(ग्म्)शतिर् द्वे द्वे वि(ग्म्)शतिर् यद् यद् वि(ग्म्)शतिर् द्वे ।

(38)[P13] 5.3.3.3(31)– वि(ग्म्)शतिः । द्वे । तेन ।

वि(ग्म्)शतिर् द्वे द्वे वि(ग्म्)शतिर् वि(ग्म्)शतिर् द्वे तेन तेन द्वे वि(ग्म्)शतिर् वि(ग्म्)शतिर् द्वे तेन ।

(39)[P13] 5.3.3.3(32)– द्वे । तेन । विराजौ ।

द्वे तेन तेन द्वे द्वे तेन विराजौ विराजौ तेन द्वे द्वे तेन विराजौ ।

(40)[P13] 5.3.3.3(32)– द्वे ।

द्वे इति द्वे ।

(41)[P13] 5.3.3.3(33)– तेन । विराजौ । यत् ।

तेन विराजौ विराजौ तेन तेन विराजौ यद् यद् विराजौ तेन तेन विराजौ यत् ।

(42)[P13] 5.3.3.3(34)– विराजौ । यत् । द्वे ।

विराजौ यद् यद् विराजौ विराजौ यद् द्वे द्वे यद् विराजौ विराजौ यद् द्वे ।

(43)[P13] 5.3.3.3(34)– विराजौ ।

विराजाविति वि – राजौ ।

(44)[P13] 5.3.3.3(35)– यत् । द्वे । प्रतिष्ठा ।

यद् द्वे द्वे यद् यद् द्वे प्रतिष्ठा प्रतिष्ठा द्वे यद् यद् द्वे प्रतिष्ठा ।

(45)[P13] 5.3.3.3(36)– द्वे । प्रतिष्ठा । तेन ।

द्वे प्रतिष्ठा प्रतिष्ठा द्वे द्वे प्रतिष्ठा तेन तेन प्रतिष्ठा द्वे द्वे प्रतिष्ठा तेन ।

(46)[P13] 5.3.3.3(36)– द्वे ।

द्वे इति द्वे ।

(47)[P13] 5.3.3.3(37)– प्रतिष्ठा । तेन । विराजोः ।

प्रतिष्ठा तेन तेन प्रतिष्ठा प्रतिष्ठा तेन विराजोर् विराजो स्तेन प्रतिष्ठा प्रतिष्ठा तेन विराजोः ।

(48)[P13] 5.3.3.3(37)– प्रतिष्ठा ।

प्रतिष्ठेति प्रति – स्था ।

(49)[P13] 5.3.3.3(38)– तेन । विराजोः । एव ।

तेन विराजोर् विराजो स्तेन तेन विराजो रेवैव विराजो स्तेन तेन विराजो रेव ।

(50)[P13] 5.3.3.3(39)– विराजोः । एव । अभिपूर्वम् ।

विराजो रेवैव विराजोर् विराजो रेवाभिपूर्व मभिपूर्व मेव विराजोर् विराजो रेवाभिपूर्वम् ।

(51)[P13] 5.3.3.3(39)– विराजोः ।

विराजोरिति वि – राजोः ।

(52)[P13] 5.3.3.3(40)– एव । अभिपूर्वम् । अन्नाद्ये ।

एवाभिपूर्व मभिपूर्व मेवैवा भिपूर्व मन्नाद्ये ऽन्नाद्ये ऽभिपूर्व मेवैवा भिपूर्व मन्नाद्ये ।

(53)[P13] 5.3.3.3(41)– अभिपूर्वम् । अन्नाद्ये । प्रति ।

अभिपूर्व मन्नाद्ये ऽन्नाद्ये ऽभिपूर्व मभिपूर्व मन्नाद्ये प्रति प्रत्यन्नाद्ये ऽभिपूर्व मभिपूर्व मन्नाद्ये प्रति ।

(54)[P13] 5.3.3.3(41)– अभिपूर्वम् ।

अभिपूर्वमित्यभि – पूर्वम् ।

(55)[P13] 5.3.3.3(42)– अन्नाद्ये । प्रति । तिष्ठति ।

अन्नाद्ये प्रति प्रत्यन्नाद्ये ऽन्नाद्ये प्रति तिष्ठति तिष्ठति प्रत्यन्नाद्ये ऽन्नाद्ये प्रति तिष्ठति ।

(56)[P13] 5.3.3.3(42)– अन्नाद्ये ।

अन्नाद्य इत्यन्न – अद्ये ।

(57)[P13] 5.3.3.3(43)– प्रति । तिष्ठति । तपः ।

प्रति तिष्ठति तिष्ठति प्रति प्रति तिष्ठति तप स्तप स्तिष्ठति प्रति प्रति तिष्ठति तपः ।

(58)[P13] 5.3.3.3(44)– तिष्ठति । तपः । नवदशः ।

तिष्ठति तप स्तप स्तिष्ठति तिष्ठति तपो नवदशो नवदश स्तप स्तिष्ठति तिष्ठति तपो नवदशः ।

(59)[P13] 5.3.3.3(45)– तपः । नवदशः । इति ।

तपो नवदशो नवदश स्तप स्तपो नवदश इतीति नवदश स्तप स्तपो नवदश इति ।

(60)[P13] 5.3.3.3(46)– नवदशः । इति । उत्तरतः ।

नवदश इतीति नवदशो नवदश इत्युत्तरत उत्तरत इति नवदशो नवदश इत्युत्तरतः ।

(61)[P13] 5.3.3.3(46)– नवदशः ।

नवदश इति नव – दशः ।

(62)[P13] 5.3.3.3(47)– इति । उत्तरतः । तस्मात् ।

इत्युत्तरत उत्तरत इती त्युत्तरत स्तस्मात् तस्मा दुत्तरत इती त्युत्तरत स्तस्मात् ।

(63)[P13] 5.3.3.3(48)– उत्तरतः । तस्मात् । सव्यः ।

उत्तरत स्तस्मात् तस्मा दुत्तरत उत्तरत स्तस्माथ् सव्यः सव्य स्तस्मा दुत्तरत उत्तरत
स्तस्माथ् सव्यः ।

(64)[P13] 5.3.3.3(48)– उत्तरतः ।

उत्तरत इत्युत् – तरतः ।

(65)[P13] 5.3.3.3(49)– तस्मात् । सव्यः । हस्तयोः ।

तस्माथ् सव्यः सव्य स्तस्मात् तस्माथ् सव्यो हस्तयोर्. हस्तयोः सव्य स्तस्मात् तस्माथ्
सव्यो हस्तयोः ।

(66)[P13] 5.3.3.3(50)– सव्यः । हस्तयोः । तपस्वितरः ।

सव्यो हस्तयोर्. हस्तयोः सव्यः सव्यो हस्तयो स्तपस्वितर स्तपस्वितरो हस्तयोः सव्यः
सव्यो हस्तयो स्तपस्वितरः ।

(1)[P14] 5.3.3.4(1)- हस्तयोः । तपस्वितरः । योनिः ।

हस्तयो स्तपस्वितर स्तपस्वितरो हस्तयोर्. हस्तयो स्तपस्वितरो योनिर् योनि स्तपस्वितरो हस्तयोर्. हस्तयो स्तपस्वितरो योनिः ।

(2)[P14] 5.3.3.4(2)- तपस्वितरः । योनिः । चतुर्वि(ग्म्)शः ।

तपस्वितरो योनिर् योनि स्तपस्वितर स्तपस्वितरो योनि श्चतुर्वि(ग्म्)श श्चतुर्वि(ग्म्)शो योनि स्तपस्वितर स्तपस्वितरो योनि श्चतुर्वि(ग्म्)शः ।

(3)[P14] 5.3.3.4(2)- तपस्वितरः ।

तपस्वितर इति तपस्वि - तरः ।

(4)[P14] 5.3.3.4(3)- योनिः । चतुर्वि(ग्म्)शः । इति ।

योनि श्चतुर्वि(ग्म्)श श्चतुर्वि(ग्म्)शो योनिर् योनि श्चतुर्वि(ग्म्)श इतीति चतुर्वि(ग्म्)शो योनिर् योनि श्चतुर्वि(ग्म्)श इति ।

(5)[P14] 5.3.3.4(4)- चतुर्वि(ग्म्)शः । इति । पुरस्तात् ।

चतुर्वि(ग्म्)श इतीति चतुर्वि(ग्म्)श श्चतुर्वि(ग्म्)श इति पुरस्तात् पुरस्ता दिति चतुर्वि(ग्म्)श श्चतुर्वि(ग्म्)श इति पुरस्तात् ।

(6)[P14] 5.3.3.4(4)- चतुर्वि(ग्म्)शः ।

चतुर्वि(ग्म्)श इति चतुः - वि(ग्म्)शः ।

(7)[P14] 5.3.3.4(5)- इति । पुरस्तात् । उप ।

इति पुरस्तात् पुरस्ता दितीति पुरस्ता दुपोप पुरस्ता दितीति पुरस्ता दुप ।

(8)[P14] 5.3.3.4(6)- पुरस्तात् । उप । दधाति ।

पुरस्ता दुपोप पुरस्तात् पुरस्ता दुप दधाति दधा त्युप पुरस्तात् पुरस्ता दुप दधाति ।

(9)[P14] 5.3.3.4(7)– उप । दधाति । चतुर्वि(ग्म्)शत्यक्षरा ।

उप दधाति दधा त्युपोप दधाति चतुर्वि(ग्म्)शत्यक्षरा चतुर्वि(ग्म्)शत्यक्षरा दधा त्युपोप दधाति चतुर्वि(ग्म्)शत्यक्षरा ।

(10)[P14] 5.3.3.4(8)– दधाति । चतुर्वि(ग्म्)शत्यक्षरा । गायत्री ।

दधाति चतुर्वि(ग्म्)शत्यक्षरा चतुर्वि(ग्म्)शत्यक्षरा दधाति दधाति चतुर्वि(ग्म्)शत्यक्षरा गायत्री गायत्री चतुर्वि(ग्म्)शत्यक्षरा दधाति दधाति चतुर्वि(ग्म्)शत्यक्षरा गायत्री ।

(11)[P14] 5.3.3.4(9)– चतुर्वि(ग्म्)शत्यक्षरा । गायत्री । गायत्री ।

चतुर्वि(ग्म्)शत्यक्षरा गायत्री गायत्री चतुर्वि(ग्म्)शत्यक्षरा चतुर्वि(ग्म्)शत्यक्षरा गायत्री ।

(12)[P14] 5.3.3.4(9)– चतुर्वि(ग्म्)शत्यक्षरा ।

चतुर्वि(ग्म्)शत्यक्षरेति चतुर्वि(ग्म्)शति – अक्षरा ।

(13)[P14] 5.3.3.4(10)– गायत्री । गायत्री ।

गायत्री गायत्री ।

(14)[P14] 5.3.3.4(11)– गायत्री । यज्ञमुखम् । यज्ञमुखम् ।

गायत्री यज्ञमुखं ँयज्ञमुखम् गायत्री गायत्री यज्ञमुखम् ।

(15)[P14] 5.3.3.4(12)– यज्ञमुखम् । यज्ञमुखम् ।

यज्ञमुखं ँयज्ञमुखम् ।

(16)[P14] 5.3.3.4(12)– यज्ञमुखम् ।

यज्ञमुखमिति यज्ञ – मुखम् ।

(17)[P14] 5.3.3.4(13)– यज्ञमुखम् । एव । पुरस्तात् ।

यज्ञमुख मेवैव यज्ञमुखं ँयज्ञमुख मेव पुरस्तात् पुरस्ता देव यज्ञमुखं ँयज्ञमुख मेव पुरस्तात् ।

(18)[P14] 5.3.3.4(13)– यज्ञमुखम् ।

यज्ञमुखमिति यज्ञ – मुखम् ।

(19)[P14] 5.3.3.4(14)– एव । पुरस्तात् । वि ।

एव पुरस्तात् पुरस्ता देवैव पुरस्ताद् वि वि पुरस्ता देवैव पुरस्ताद् वि ।

(20)[P14] 5.3.3.4(15)– पुरस्तात् । वि । यातयति ।

पुरस्ताद् वि वि पुरस्तात् पुरस्ताद् वि यातयति यातयति वि पुरस्तात् पुरस्ताद् वि यातयति ।

(21)[P14] 5.3.3.4(16)– वि । यातयति । गर्भाः ।

वि यातयति यातयति वि वि यातयति गर्भा गर्भा यातयति वि वि यातयति गर्भाः ।

(22)[P14] 5.3.3.4(17)– यातयति । गर्भाः । पञ्चवि(ग्म्)शः ।

यातयति गर्भा गर्भा यातयति यातयति गर्भाः पञ्चवि(ग्म्)शः पञ्चवि(ग्म्)शो गर्भा यातयति यातयति गर्भाः पञ्चवि(ग्म्)शः ।

(23)[P14] 5.3.3.4(18)– गर्भाः । पञ्चवि(ग्म्)शः । इति ।

गर्भाः पञ्चवि(ग्म्)शः पञ्चवि(ग्म्)शो गर्भा गर्भाः पञ्चवि(ग्म्)श इतीति पञ्चवि(ग्म्)शो गर्भा गर्भाः पञ्चवि(ग्म्)श इति ।

(24)[P14] 5.3.3.4(19)– पञ्चवि(ग्म्)शः । इति । दक्षिणतः ।

पञ्चवि(ग्म्)श इतीति पञ्चवि(ग्म्)शः पञ्चवि(ग्म्)श इति दक्षिणतो दक्षिणत इति पञ्चवि(ग्म्)शः पञ्चवि(ग्म्)श इति दक्षिणतः ।

(25)[P14] 5.3.3.4(19)– पञ्चवि(ग्म्)शः ।

पञ्चवि(ग्म्)श इति पञ्च – वि(ग्म्)शः ।

(26)[P14] 5.3.3.4(20)– इति । दक्षिणतः । अन्नम् ।

इति दक्षिणतो दक्षिणत इतीति दक्षिणतो ऽन्न मन्नम् दक्षिणत इतीति दक्षिणतो ऽन्नम् ।

(27)[P14] 5.3.3.4(21)– दक्षिणतः । अन्नम् । वै ।

दक्षिणतो ऽन्न मन्नम् दक्षिणतो दक्षिणतो ऽन्नं ँवै वा अन्नम् दक्षिणतो दक्षिणतो ऽन्नं ँवै ।

(28)[P14] 5.3.3.4(22)– अन्नम् । वै । गर्भाः ।

अन्नं ँवै वा अन्न मन्नं ँवै गर्भा गर्भा वा अन्न मन्नं ँवै गर्भाः ।

(29)[P14] 5.3.3.4(23)– वै । गर्भाः । अन्नम् ।

वै गर्भा गर्भा वै वै गर्भा अन्न मन्नम् गर्भा वै वै गर्भा अन्नम् ।

(30)[P14] 5.3.3.4(24)– गर्भाः । अन्नम् । पञ्चवि(ग्म्)शः ।

गर्भा अन्न मन्नम् गर्भा गर्भा अन्नम् पञ्चवि(ग्म्)शः पञ्चवि(ग्म्)शो ऽन्नम् गर्भा गर्भा अन्नम् पञ्चवि(ग्म्)शः ।

(31)[P14] 5.3.3.4(25)– अन्नम् । पञ्चवि(ग्म्)शः । अन्नम् ।

अन्नम् पञ्चवि(ग्म्)शः पञ्चवि(ग्म्)शो ऽन्न मन्नम् पञ्चवि(ग्म्)शो ऽन्न मन्नम् पञ्चवि(ग्म्)शो ऽन्न मन्नम् पञ्चवि(ग्म्)शो ऽन्नम् ।

(32)[P14] 5.3.3.4(26)– पञ्चवि(ग्म्)शः । अन्नम् । एव ।

पञ्चवि(ग्म्)शो ऽन्न मन्नम् पञ्चवि(ग्म्)शः पञ्चवि(ग्म्)शो ऽन्न मेवैवान्नम् पञ्चवि(ग्म्)शः पञ्चवि(ग्म्)शो ऽन्न मेव ।

(33)[P14] 5.3.3.4(26)– पञ्चवि(ग्म्)शः ।

पञ्चवि(ग्म्)श इति पञ्च – वि(ग्म्)शः ।

(34)[P14] 5.3.3.4(27)– अन्नम् । एव । दक्षिणतः ।

अन्न मेवै वान्न मन्न मेव दक्षिणतो दक्षिणत एवान्न मन्न मेव दक्षिणतः ।

(35)[P14] 5.3.3.4(28)– एव । दक्षिणतः । धत्ते ।

एव दक्षिणतो दक्षिणत एवैव दक्षिणतो धत्ते धत्ते दक्षिणत एवैव दक्षिणतो धत्ते ।

(36)[P14] 5.3.3.4(29)– दक्षिणतः । धत्ते । तस्मात् ।

दक्षिणतो धत्ते धत्ते दक्षिणतो दक्षिणतो धत्ते तस्मात् तस्माद् धत्ते दक्षिणतो दक्षिणतो धत्ते तस्मात् ।

(37)[P14] 5.3.3.4(30)– धत्ते । तस्मात् । दक्षिणेन ।

धत्ते तस्मात् तस्माद् धत्ते धत्ते तस्माद् दक्षिणेन दक्षिणेन तस्माद् धत्ते धत्ते तस्माद् दक्षिणेन ।

(38)[P14] 5.3.3.4(31)– तस्मात् । दक्षिणेन । अन्नम् ।

तस्माद् दक्षिणेन दक्षिणेन तस्मात् तस्माद् दक्षिणेनान्न मन्नम् दक्षिणेन तस्मात् तस्माद् दक्षिणेनान्नम् ।

(39)[P14] 5.3.3.4(32)– दक्षिणेन । अन्नम् । अद्यते ।

दक्षिणेनान्न मन्नम् दक्षिणेन दक्षिणेनान्न मद्यते ऽद्यते ऽन्नम् दक्षिणेन दक्षिणे नान्न मद्यते ।

(40)[P14] 5.3.3.4(33)– अन्नम् । अद्यते । ओजः ।

अन्न मद्यते ऽद्यते ऽन्न मन्न मद्यत ओज ओजो ऽद्यते ऽन्न मन्न मद्यत ओजः ।

(41)[P14] 5.3.3.4(34)– अद्यते । ओजः । त्रिणवः ।

अद्यत ओज ओजो ऽद्यते ऽद्यत ओज स्त्रिणव स्त्रिणव ओजो ऽद्यते ऽद्यत ओज स्त्रिणवः ।

(42)[P14] 5.3.3.4(35)– ओजः । त्रिणवः । इति ।

ओज स्त्रिणव स्त्रिणव ओज ओज स्त्रिणव इतीति त्रिणव ओज ओज स्त्रिणव इति ।

(43)[P14] 5.3.3.4(36)– त्रिणवः । इति । पश्चात् ।

त्रिणव इतीति त्रिणव स्त्रिणव इति पश्चात् पश्चा दिति त्रिणव स्त्रिणव इति पश्चात् ।

(44)[P14] 5.3.3.4(36)– त्रिणवः ।

त्रिणव इति त्रि – नवः ।

(45)[P14] 5.3.3.4(37)– इति । पश्चात् । इमे ।

इति पश्चात् पश्चा दितीति पश्चाद् इम इमे पश्चा दितीति पश्चा दिमे ।

(46)[P14] 5.3.3.4(38)– पश्चात् । इमे । वै ।

पश्चादिम इमे पश्चात् पश्चादिमे वै वा इमे पश्चात् पश्चादिमे वै ।

(47)[P14] 5.3.3.4(39)– इमे । वै । लोकाः ।

इमे वै वा इम इमे वै लोका लोका वा इम इमे वै लोकाः ।

(48)[P14] 5.3.3.4(40)– वै । लोकाः । त्रिणवः ।

वै लोका लोका वै वै लोका स्त्रिणव स्त्रिणवो लोका वै वै लोका स्त्रिणवः ।

(49)[P14] 5.3.3.4(41)– लोकाः । त्रिणवः । एषु ।

लोका स्त्रिणव स्त्रिणवो लोका लोका स्त्रिणव एष्वेषु त्रिणवो लोका लोका स्त्रिणव एषु ।

(50)[P14] 5.3.3.4(42)– त्रिणवः । एषु । एव । (GS–5.3–07)

त्रिणव एष्वेषु त्रिणव स्त्रिणव एष्वे वैवैषु त्रिणव स्त्रिणव एष्वेव ।

(51)[P14] 5.3.3.4(42)– त्रिणवः । (GS–5.3–07)

त्रिणव इति त्रि – नवः ।

(52)[P14] 5.3.3.4(43)– एषु । एव । लोकेषु । (JD–55,GS–5.3–07)

एष्वे वैवैष्वे(1)ष्वेव लोकेषु लोके ष्वेवैष्वे(1) ष्वेव लोकेषु ।

(53)[P14] 5.3.3.4(44)– एव । लोकेषु । प्रति । (JD–55,GS–5.3–07)

एव लोकेषु लोके ष्वेवैव लोकेषु प्रति प्रति लोके ष्वेवैव लोकेषु प्रति ।

(54)[P14] 5.3.3.4(45)– लोकेषु । प्रति । तिष्ठति । (JD–55,GS–5.3–07)

लोकेषु प्रति प्रति लोकेषु लोकेषु प्रति तिष्ठति तिष्ठति प्रति लोकेषु लोकेषु प्रति तिष्ठति ।

(55)[P14] 5.3.3.4(46)– प्रति । तिष्ठति । संभरणः ।

प्रति तिष्ठति तिष्ठति प्रति प्रति तिष्ठति संभरणः संभरण स्तिष्ठति प्रति प्रति तिष्ठति संभरणः ।

(56)[P14] 5.3.3.4(47)– तिष्ठति । संभरणः । त्रयोवि(ग्म्)शः ।

तिष्ठति संभरणः संभरण स्तिष्ठति तिष्ठति संभरण स्त्रयोवि(ग्म्)श स्त्रयोवि(ग्म्)शः संभरणस्तिष्ठति तिष्ठति संभरण स्त्रयोवि(ग्म्)शः ।

(57)[P14] 5.3.3.4(48)– संभरणः । त्रयोवि(ग्म्)शः । इति ।

संभरण स्त्रयोवि(ग्म्)श स्त्रयोवि(ग्म्)शः संभरणः संभरण स्त्रयोवि(ग्म्)श इतीति त्रयोवि(ग्म्)शः संभरणः संभरण स्त्रयोवि(ग्म्)श इति ।

(58)[P14] 5.3.3.4(48)– संभरणः ।

संभरण इति सं – भरणः ।

(59)[P14] 5.3.3.4(49)– त्रयोवि(ग्म्)शः । इति । उत्तरतः ।

त्रयोवि(ग्म्)श इतीति त्रयोवि(ग्म्)श स्त्रयोवि(ग्म्)श इत्युत्तरत उत्तरत इति त्रयोवि(ग्म्)श स्त्रयोवि(ग्म्)श इत्युत्तरतः ।

(60)[P14] 5.3.3.4(49)– त्रयोवि(ग्म्)शः ।

त्रयोवि(ग्म्)श इति त्रयः – वि(ग्म्)शः ।

(61)[P14] 5.3.3.4(50)– इति । उत्तरतः । तस्मात् ।

इत्युत्तरत उत्तरत इतीत्युत्तरत स्तस्मात् तस्मा दुत्तरत इतीत्युत्तरत स्तस्मात् ।

(1)[P15] 5.3.3.5(1)– उत्तरतः । तस्मात् । सव्यः ।

उत्तरत स्तस्मात् तस्मा दुत्तरत उत्तरत स्तस्माथ् सव्यः सव्य स्तस्मा दुत्तरत उत्तरत स्तस्माथ् सव्यः ।

(2)[P15] 5.3.3.5(1)- उत्तरतः ।

उत्तरत इत्युत् - तरतः ।

(3)[P15] 5.3.3.5(2)- तस्मात् । सव्यः । हस्तयोः ।

तस्माथ् सव्यः सव्य स्तस्मात् तस्माथ् सव्यो हस्तयोर्. हस्तयोः सव्य स्तस्मात् तस्माथ् सव्यो हस्तयोः ।

(4)[P15] 5.3.3.5(3)- सव्यः । हस्तयोः । संभार्यतरः ।

सव्यो हस्तयोर्. हस्तयोः सव्यः सव्यो हस्तयोः संभार्यतरः संभार्यतरो हस्तयोः सव्यः सव्यो हस्तयोः संभार्यतरः ।

(5)[P15] 5.3.3.5(4)- हस्तयोः । संभार्यतरः । क्रतुः ।

हस्तयोः संभार्यतरः संभार्यतरो हस्तयोर्. हस्तयोः संभार्यतरः क्रतुः क्रतुः संभार्यतरो हस्तयोर्. हस्तयोः संभार्यतरः क्रतुः ।

(6)[P15] 5.3.3.5(5)- संभार्यतरः । क्रतुः । एकत्रि(ग्म्)शः ।

संभार्यतरः क्रतुः क्रतुः संभार्यतरः संभार्यतरः क्रतु रेकत्रि(ग्म्)श एकत्रि(ग्म्)शः क्रतुः संभार्यतरः संभार्यतरः क्रतु रेकत्रि(ग्म्)शः ।

(7)[P15] 5.3.3.5(5)- संभार्यतरः ।

संभार्यतर इति संभार्य - तरः ।

(8)[P15] 5.3.3.5(6)- क्रतुः । एकत्रि(ग्म्)शः । इति ।

क्रतु रेकत्रि(ग्म्)श एकत्रि(ग्म्)शः क्रतुः क्रतु रेकत्रि(ग्म्)श इती त्येकत्रि(ग्म्)शः क्रतुः क्रतु रेकत्रि(ग्म्)श इति ।

(9)[P15] 5.3.3.5(7)- एकत्रि(ग्म्)शः । इति । पुरस्तात् ।

एकत्रि(ग्म्)श इती त्येकत्रि(ग्म्)श एकत्रि(ग्म्)श इति पुरस्तात् पुरस्तादि त्येकत्रि(ग्म्)श एकत्रि(ग्म्)श इति पुरस्तात् ।

(10)[P15] 5.3.3.5(7)- एकत्रि(ग्म्)शः ।

एकत्रि(ग्म्)श इत्येक - त्रि(ग्म्)शः ।

(11)[P15] 5.3.3.5(8)- इति । पुरस्तात् । उप ।

इति पुरस्तात् पुरस्ता दितीति पुरस्ता दुपोप पुरस्ता दितीति पुरस्ता दुप ।

(12)[P15] 5.3.3.5(9)- पुरस्तात् । उप । दधाति ।

पुरस्ता दुपोप पुरस्तात् पुरस्ता दुप दधाति दधा त्युप पुरस्तात् पुरस्ता दुप दधाति ।

(13)[P15] 5.3.3.5(10)- उप । दधाति । वाक् ।

उप दधाति दधा त्युपोप दधाति वाग् वाग् दधा त्युपोप दधाति वाक् ।

(14)[P15] 5.3.3.5(11)- दधाति । वाक् । वै ।

दधाति वाग् वाग् दधाति दधाति वाग् वै वै वाग् दधाति दधाति वाग् वै ।

(15)[P15] 5.3.3.5(12)- वाक् । वै । क्रतुः ।

वाग् वै वै वाग् वाग् वै क्रतुः क्रतुर् वै वाग् वाग् वै क्रतुः ।

(16)[P15] 5.3.3.5(13)- वै । क्रतुः । यज्ञमुखम् ।

वै क्रतुः क्रतुर् वै वै क्रतुर् यज्ञमुखं ँयज्ञमुखम् क्रतुर् वै वै क्रतुर् यज्ञमुखम् ।

(17)[P15] 5.3.3.5(14)- क्रतुः । यज्ञमुखम् । वाक् ।

क्रतुर् यज्ञमुखं ँयज्ञमुखम् क्रतुः क्रतुर् यज्ञमुखं ँवाग् वाग् यज्ञमुखम् क्रतुः क्रतुर् यज्ञमुखं ँवाक् ।

(18)[P15] 5.3.3.5(15)– यज्ञमुखम् । वाक् । यज्ञमुखम् ।

यज्ञमुखं ँवाग् वाग् यज्ञमुखं ँयज्ञमुखं ँवाग् यज्ञमुखं ँयज्ञमुखं ँवाग् यज्ञमुखं ँयज्ञमुखं ँवाग् यज्ञमुखम् ।

(19)[P15] 5.3.3.5(15)– यज्ञमुखम् ।

यज्ञमुखमिति यज्ञ – मुखम् ।

(20)[P15] 5.3.3.5(16)– वाक् । यज्ञमुखम् । एव ।

वाग् यज्ञमुखं ँयज्ञमुखं ँवाग् वाग् यज्ञमुख मेवैव यज्ञमुखं ँवाग् वाग् यज्ञमुख मेव ।

(21)[P15] 5.3.3.5(17)– यज्ञमुखम् । एव । पुरस्तात् ।

यज्ञमुख मेवैव यज्ञमुखं ँयज्ञमुख मेव पुरस्तात् पुरस्ता देव यज्ञमुखं ँयज्ञमुख मेव पुरस्तात् ।

(22)[P15] 5.3.3.5(17)– यज्ञमुखम् ।

यज्ञमुखमिति यज्ञ – मुखम् ।

(23)[P15] 5.3.3.5(18)– एव । पुरस्तात् । वि ।

एव पुरस्तात् पुरस्ता देवैव पुरस्ताद् वि वि पुरस्ता देवैव पुरस्ताद् वि ।

(24)[P15] 5.3.3.5(19)– पुरस्तात् । वि । यातयति ।

पुरस्ताद् वि वि पुरस्तात् पुरस्ताद् वि यातयति यातयति वि पुरस्तात् पुरस्ताद् वि यातयति ।

(25)[P15] 5.3.3.5(20)– वि । यातयति । ब्रद्ध्नस्य ।

वि यातयति यातयति वि वि यातयति ब्रद्ध्नस्य ब्रद्ध्नस्य यातयति वि वि यातयति ब्रद्ध्नस्य ।

(26)[P15] 5.3.3.5(21)– यातयति । ब्रद्ध्नस्य । विष्टपम् ।

यातयति ब्रद्ध्नस्य ब्रद्ध्नस्य यातयति यातयति ब्रद्ध्नस्य विष्टपं ँविष्टपम् ब्रद्ध्नस्य यातयति यातयति ब्रद्ध्नस्य विष्टपम् ।

(27)[P15] 5.3.3.5(22)- ब्रद्ध्नस्य । विष्टपम् । चतुस्त्रि(ग्म्)शः ।

ब्रद्ध्नस्य विष्टपं ँविष्टपम् ब्रद्ध्नस्य ब्रद्ध्नस्य विष्टपम् चतुस्त्रि(ग्म्)श श्चतुस्त्रि(ग्म्)शो विष्टपम् ब्रद्ध्नस्य ब्रद्ध्नस्य विष्टपम् चतुस्त्रि(ग्म्)शः ।

(28)[P15] 5.3.3.5(23)- विष्टपम् । चतुस्त्रि(ग्म्)शः । इति ।

विष्टपम् चतुस्त्रि(ग्म्)श श्चतुस्त्रि(ग्म्)शो विष्टपं ँविष्टपम् चतुस्त्रि(ग्म्)श इतीति चतुस्त्रि(ग्म्)शो विष्टपं ँविष्टपम् चतुस्त्रि(ग्म्)श इति ।

(29)[P15] 5.3.3.5(24)- चतुस्त्रि(ग्म्)शः । इति । दक्षिणतः ।

चतुस्त्रि(ग्म्)श इतीति चतुस्त्रि(ग्म्)श श्चतुस्त्रि(ग्म्)श इति दक्षिणतो दक्षिणत इति चतुस्त्रि(ग्म्)श श्चतुस्त्रि(ग्म्)श इति दक्षिणतः ।

(30)[P15] 5.3.3.5(24)- चतुस्त्रि(ग्म्)शः ।

चतुस्त्रि(ग्म्)श इति चतुः - त्रि(ग्म्)शः ।

(31)[P15] 5.3.3.5(25)- इति । दक्षिणतः । असौ ।

इति दक्षिणतो दक्षिणत इतीति दक्षिणतो ऽसा वसौ दक्षिणत इतीति दक्षिणतो ऽसौ ।

(32)[P15] 5.3.3.5(26)- दक्षिणतः । असौ । वै ।

दक्षिणतो ऽसा वसौ दक्षिणतो दक्षिणतो ऽसौ वै वा असौ दक्षिणतो दक्षिणतो ऽसौ वै ।

(33)[P15] 5.3.3.5(27)- असौ । वै । आदित्यः ।

असौ वै वा असा वसौ वा आदित्य आदित्यो वा असा वसौ वा आदित्यः ।

(34)[P15] 5.3.3.5(28)- वै । आदित्यः । ब्रद्ध्नस्य ।

वा आदित्य आदित्यो वै वा आदित्यो ब्रद्ध्नस्य ब्रद्ध्न स्यादित्यो वै वा आदित्यो ब्रद्ध्नस्य ।

(35)[P15] 5.3.3.5(29)– आदित्यः । ब्रद्ध्नस्य । विष्टपम् ।

आदित्यो ब्रद्ध्नस्य ब्रद्ध्न स्यादित्य आदित्यो ब्रद्ध्नस्य विष्टपं ँविष्टपम् ब्रद्ध्न स्यादित्य आदित्यो ब्रद्ध्नस्य विष्टपम् ।

(36)[P15] 5.3.3.5(30)– ब्रद्ध्नस्य । विष्टपम् । ब्रह्मवर्चसम् ।

ब्रद्ध्नस्य विष्टपं ँविष्टपम् ब्रद्ध्नस्य ब्रद्ध्नस्य विष्टपम् ब्रह्मवर्चसम् ब्रह्मवर्चसं ँविष्टपम् ब्रद्ध्नस्य ब्रद्ध्नस्य विष्टपम् ब्रह्मवर्चसम् ।

(37)[P15] 5.3.3.5(31)– विष्टपम् । ब्रह्मवर्चसम् । एव ।

विष्टपम् ब्रह्मवर्चसम् ब्रह्मवर्चसं ँविष्टपं ँविष्टपम् ब्रह्मवर्चस मेवैव ब्रह्मवर्चसं ँविष्टपं ँविष्टपम् ब्रह्मवर्चस मेव ।

(38)[P15] 5.3.3.5(32)– ब्रह्मवर्चसम् । एव । दक्षिणतः ।

ब्रह्मवर्चस मेवैव ब्रह्मवर्चसम् ब्रह्मवर्चस मेव दक्षिणतो दक्षिणत एव ब्रह्मवर्चसम् ब्रह्मवर्चस मेव दक्षिणतः ।

(39)[P15] 5.3.3.5(32)– ब्रह्मवर्चसम् ।

ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् ।

(40)[P15] 5.3.3.5(33)– एव । दक्षिणतः । धत्ते ।

एव दक्षिणतो दक्षिणत एवैव दक्षिणतो धत्ते धत्ते दक्षिणत एवैव दक्षिणतो धत्ते ।

(41)[P15] 5.3.3.5(34)– दक्षिणतः । धत्ते । तस्मात् ।

दक्षिणतो धत्ते धत्ते दक्षिणतो दक्षिणतो धत्ते तस्मात् तस्माद् धत्ते दक्षिणतो दक्षिणतो धत्ते तस्मात् ।

(42)[P15] 5.3.3.5(35)– धत्ते । तस्मात् । दक्षिणः ।

धत्ते तस्मात् तस्माद् धत्ते धत्ते तस्माद् दक्षिणो दक्षिण स्तस्माद् धत्ते धत्ते तस्माद् दक्षिणः ।

(43)[P15] 5.3.3.5(36)- तस्मात् । दक्षिणः । अर्द्धः ।

तस्माद् दक्षिणो दक्षिण स्तस्मात् तस्माद् दक्षिणो ऽर्द्धो ऽर्द्धो दक्षिण स्तस्मात् तस्माद् दक्षिणो ऽर्द्धः ।

(44)[P15] 5.3.3.5(37)- दक्षिणः । अर्द्धः । ब्रह्मवर्चसितरः ।

दक्षिणो ऽर्द्धो ऽर्द्धो दक्षिणो दक्षिणो ऽर्द्धो ब्रह्मवर्चसितरो ब्रह्मवर्चसितरो ऽर्द्धो दक्षिणो दक्षिणो ऽर्द्धो ब्रह्मवर्चसितरः ।

(45)[P15] 5.3.3.5(38)- अर्द्धः । ब्रह्मवर्चसितरः । प्रतिष्ठा ।

अर्द्धो ब्रह्मवर्चसितरो ब्रह्मवर्चसितरो ऽर्द्धो ऽर्द्धो ब्रह्मवर्चसितरः प्रतिष्ठा प्रतिष्ठा ब्रह्मवर्चसितरो ऽर्द्धो ऽर्द्धो ब्रह्मवर्चसितरः प्रतिष्ठा ।

(46)[P15] 5.3.3.5(39)- ब्रह्मवर्चसितरः । प्रतिष्ठा । त्रयस्त्रि(ग्म्)शः ।

ब्रह्मवर्चसितरः प्रतिष्ठा प्रतिष्ठा ब्रह्मवर्चसितरो ब्रह्मवर्चसितरः प्रतिष्ठा त्रयस्त्रि(ग्म्)श स्त्रयस्त्रि(ग्म्)शः प्रतिष्ठा ब्रह्मवर्चसितरो ब्रह्मवर्चसितरः प्रतिष्ठा त्रयस्त्रि(ग्म्)शः ।

(47)[P15] 5.3.3.5(39)- ब्रह्मवर्चसितरः ।

ब्रह्मवर्चसितर इति ब्रह्मवर्चसि - तरः ।

(48)[P15] 5.3.3.5(40)- प्रतिष्ठा । त्रयस्त्रि(ग्म्)शः । इति ।

प्रतिष्ठा त्रयस्त्रि(ग्म्)श स्त्रयस्त्रि(ग्म्)शः प्रतिष्ठा प्रतिष्ठा त्रयस्त्रि(ग्म्)श इतीति त्रयस्त्रि(ग्म्)शः प्रतिष्ठा प्रतिष्ठा त्रयस्त्रि(ग्म्)श इति ।

(49)[P15] 5.3.3.5(40)- प्रतिष्ठा ।

प्रतिष्ठेति प्रति - स्था ।

(50)[P15] 5.3.3.5(41)– त्रयस्त्रि(ग्म्)शः । इति । पश्चात् ।

त्रयस्त्रि(ग्म्)श इतीति त्रयस्त्रि(ग्म्)श स्त्रयस्त्रि(ग्म्)श इति पश्चात् पश्चादिति त्रयस्त्रि(ग्म्)श स्त्रयस्त्रि(ग्म्)श इति पश्चात् ।

(51)[P15] 5.3.3.5(41)– त्रयस्त्रि(ग्म्)शः ।

त्रयस्त्रि(ग्म्)श इति त्रयः – त्रि(ग्म्)शः ।

(52)[P15] 5.3.3.5(42)– इति । पश्चात् । प्रतिष्ठित्यै ।

इति पश्चात् पश्चा दितीति पश्चात् प्रतिष्ठित्यै प्रतिष्ठित्यै पश्चा दितीति पश्चात् प्रतिष्ठित्यै ।

(53)[P15] 5.3.3.5(43)– पश्चात् । प्रतिष्ठित्यै । नाकः ।

पश्चात् प्रतिष्ठित्यै प्रतिष्ठित्यै पश्चात् पश्चात् प्रतिष्ठित्यै नाको नाकः प्रतिष्ठित्यै पश्चात् पश्चात् प्रतिष्ठित्यै नाकः ।

(54)[P15] 5.3.3.5(44)– प्रतिष्ठित्यै । नाकः । षट्त्रि(ग्म्)शः ।

प्रतिष्ठित्यै नाको नाकः प्रतिष्ठित्यै प्रतिष्ठित्यै नाक ष्षट्त्रि(ग्म्)श ष्षट्त्रि(ग्म्)शो नाकः प्रतिष्ठित्यै प्रतिष्ठित्यै नाक ष्षट्त्रि(ग्म्)शः ।

(55)[P15] 5.3.3.5(44)– प्रतिष्ठित्यै ।

प्रतिष्ठित्या इति प्रति – स्थित्यै ।

(56)[P15] 5.3.3.5(45)– नाकः । षट्त्रि(ग्म्)शः । इति ।

नाक ष्षट्त्रि(ग्म्)श ष्षट्त्रि(ग्म्)शो नाको नाक ष्षट्त्रि(ग्म्)श इतीति षट्त्रि(ग्म्)शो नाको नाक ष्षट्त्रि(ग्म्)श इति ।

(57)[P15] 5.3.3.5(46)– षट्त्रि(ग्म्)शः । इति । उत्तरतः ।

षट्त्रि(ग्म्)श इतीति षट्त्रि(ग्म्)श ष्षट्त्रि(ग्म्)श इत्युत्तरत उत्तरत इति षट्त्रि(ग्म्)श ष्षट्त्रि(ग्म्)श इत्युत्तरतः ।

(58)[P15] 5.3.3.5(46)– षट्त्रि(ग्म्)शः ।

षट्त्रि(ग्म्)श इति षट् – त्रि(ग्म्)शः ।

(59)[P15] 5.3.3.5(47)– इति । उत्तरतः । सुवर्गः ।

इत्युत्तरत उत्तरत इती त्युत्तरतः सुवर्गः सुवर्ग उत्तरत इती त्युत्तरतः सुवर्गः ।

(60)[P15] 5.3.3.5(48)– उत्तरतः । सुवर्गः । वै ।

उत्तरतः सुवर्गः सुवर्ग उत्तरत उत्तरतः सुवर्गो वै वै सुवर्ग उत्तरत उत्तरतः सुवर्गो वै ।

(61)[P15] 5.3.3.5(48)– उत्तरतः ।

उत्तरत इत्युत् – तरतः ।

(62)[P15] 5.3.3.5(49)– सुवर्गः । वै । लोकः ।

सुवर्गो वै वै सुवर्गः सुवर्गो वै लोको लोको वै सुवर्गः सुवर्गो वै लोकः ।

(63)[P15] 5.3.3.5(49)– सुवर्गः ।

सुवर्ग इति सुवः – गः ।

(64)[P15] 5.3.3.5(50)– वै । लोकः । नाकः ।

वै लोको लोको वै वै लोको नाको नाको लोको वै वै लोको नाकः ।

(65)[P15] 5.3.3.5(51)– लोकः । नाकः । सुवर्गस्य ।

लोको नाको नाको लोको लोको नाकः सुवर्गस्य सुवर्गस्य नाको लोको लोको नाकः सुवर्गस्य ।

(66)[P15] 5.3.3.5(52)– नाकः । सुवर्गस्य । लोकस्य ।

नाकः सुवर्गस्य सुवर्गस्य नाको नाकः सुवर्गस्य लोकस्य लोकस्य सुवर्गस्य नाको नाकः सुवर्गस्य लोकस्य ।

(67)[P15] 5.3.3.5(53)– सुवर्गस्य । लोकस्य । समष्ट्यै ॥

सुवर्गस्य लोकस्य लोकस्य सुवर्गस्य सुवर्गस्य लोकस्य समष्ट्यै समष्ट्यै लोकस्य सुवर्गस्य सुवर्गस्य लोकस्य समष्ट्यै ।

(68)[P15] 5.3.3.5(53)– सुवर्गस्य ।

सुवर्गस्येति सुवः – गस्य ।

(69)[P15] 5.3.3.5(54)– लोकस्य । समष्ट्यै ॥

लोकस्य समष्ट्यै समष्ट्यै लोकस्य लोकस्य समष्ट्यै ।

(70)[P15] 5.3.3.5(55)– समष्ट्यै ॥

समष्ट्या इति सं – अष्ट्यै ।

=========

## 5.3.4 अनुवाकम् 4 – घनम्

(1)[P16] 5.3.4.1(1)– अग्नेः । भागः । असि ।

अग्नेर् भागो भागो ऽग्ने रग्नेर् भागो ऽस्यसि भागो ऽग्ने रग्नेर् भागो ऽसि ।

(2)[P16] 5.3.4.1(2)– भागः । असि । इति ।

भागो ऽस्यसि भागो भागो ऽसीती त्यसि भागो भागो ऽसीति ।

(3)[P16] 5.3.4.1(3)– असि । इति । पुरस्तात् ।

असीती त्यस्य सीति पुरस्तात् पुरस्ता दित्यस्य सीति पुरस्तात् ।

(4)[P16] 5.3.4.1(4)– इति । पुरस्तात् । उप ।

इति पुरस्तात् पुरस्ता दितीति पुरस्ता दुपोप पुरस्ता दितीति पुरस्ता दुप ।

(5)[P16] 5.3.4.1(5)– पुरस्तात् । उप । दधाति ।

पुरस्ता दुपोप पुरस्तात् पुरस्ता दुप दधाति दधा त्युप पुरस्तात् पुरस्ता दुप दधाति ।

(6)[P16] 5.3.4.1(6)– उप । दधाति । यज्ञमुखम् ।

उप दधाति दधा त्युपोप दधाति यज्ञमुखं ँयज्ञमुखम् दधा त्युपोप दधाति यज्ञमुखम् ।

(7)[P16] 5.3.4.1(7)– दधाति । यज्ञमुखम् । वै ।

दधाति यज्ञमुखं ँयज्ञमुखम् दधाति दधाति यज्ञमुखं ँवै वै यज्ञमुखम् दधाति दधाति यज्ञमुखं ँवै ।

(8)[P16] 5.3.4.1(8)– यज्ञमुखम् । वै । अग्निः ।

यज्ञमुखं ँवै वै यज्ञमुखं ँयज्ञमुखं ँवा अग्नि रग्निर् वै यज्ञमुखं ँयज्ञमुखं ँवा अग्निः ।

(9)[P16] 5.3.4.1(8)– यज्ञमुखम् ।

यज्ञमुखमिति यज्ञ – मुखम् ।

(10)[P16] 5.3.4.1(9)– वै । अ॒ग्निः । य॒ज्ञ॒मु॒खम् ।

वा अ॒ग्नि र॒ग्निर् वै वा अ॒ग्निर् य॑ज्ञमु॒खं ँ॑यज्ञमु॒ख म॒ग्निर् वै वा अ॒ग्निर् य॑ज्ञमु॒खम् ।

(11)[P16] 5.3.4.1(10)– अ॒ग्निः । य॒ज्ञ॒मु॒खम् । दी॒क्षा ।

अ॒ग्निर् य॑ज्ञमु॒खं ँ॑यज्ञमु॒ख म॒ग्नि र॒ग्निर् य॑ज्ञमु॒खम् दी॒क्षा दी॒क्षा य॑ज्ञमु॒ख म॒ग्नि र॒ग्निर् य॒॑ज्ञमु॒खम् दी॒क्षा ।

(12)[P16] 5.3.4.1(11)– य॒ज्ञ॒मु॒खम् । दी॒क्षा । य॒ज्ञ॒मु॒खम् ।

य॒ज्ञ॒मु॒खम् दी॒क्षा दी॒क्षा य॑ज्ञमु॒खं ँ॑यज्ञमु॒खम् दी॒क्षा य॑ज्ञमु॒खं ँ॑यज्ञमु॒खम् दी॒क्षा य॑ज्ञमु॒खं ँ॑यज्ञमु॒खम् दी॒क्षा य॑ज्ञमु॒खम् ।

(13)[P16] 5.3.4.1(11)– य॒ज्ञ॒मु॒खम् ।

य॒ज्ञ॒मु॒खमिति॑ यज्ञ – मु॒खम् ।

(14)[P16] 5.3.4.1(12)– दी॒क्षा । य॒ज्ञ॒मु॒खम् । ब्रह्म॑ ।

दी॒क्षा य॑ज्ञमु॒खं ँ॑यज्ञमु॒खम् दी॒क्षा दी॒क्षा य॑ज्ञमु॒खम् ब्रह्म॒ ब्रह्म॑ यज्ञमु॒खम् दी॒क्षा दी॒क्षा य॑ज्ञमु॒खम् ब्रह्म॑ ।

(15)[P16] 5.3.4.1(13)– य॒ज्ञ॒मु॒खम् । ब्रह्म॑ । य॒ज्ञ॒मु॒खम् ।

य॒ज्ञ॒मु॒खम् ब्रह्म॒ ब्रह्म॑ यज्ञमु॒खं ँ॑यज्ञमु॒खम् ब्रह्म॑ यज्ञमु॒खं ँ॑यज्ञमु॒खम् ब्रह्म॑ यज्ञमु॒खं ँ॑यज्ञमु॒खम् ब्रह्म॑ यज्ञमु॒खम् ।

(16)[P16] 5.3.4.1(13)– य॒ज्ञ॒मु॒खम् ।

य॒ज्ञ॒मु॒खमिति॑ यज्ञ – मु॒खम् ।

(17)[P16] 5.3.4.1(14)– ब्रह्म॑ । य॒ज्ञ॒मु॒खम् । त्रि॒वृत् ।

ब्रह्म॑ यज्ञमु॒खं ँ॑यज्ञमु॒खम् ब्रह्म॒ ब्रह्म॑ यज्ञमु॒खम् त्रि॒वृत् त्रि॒वृद् य॑ज्ञमु॒खम् ब्रह्म॒ ब्रह्म॑ यज्ञमु॒खम् त्रि॒वृत् ।

(18)[P16] 5.3.4.1(15)- यज्ञमुखम् । त्रिवृत् । यज्ञमुखम् ।

यज्ञमुखम् त्रिवृत् त्रिवृद् यज्ञमुखं यँज्ञमुखम् त्रिवृद् यज्ञमुखं यँज्ञमुखम् त्रिवृद् यज्ञमुखं यँज्ञमुखम् त्रिवृद् यज्ञमुखम् ।

(19)[P16] 5.3.4.1(15)- यज्ञमुखम् ।

यज्ञमुखमिति यज्ञ - मुखम् ।

(20)[P16] 5.3.4.1(16)- त्रिवृत् । यज्ञमुखम् । एव ।

त्रिवृद् यज्ञमुखं यँज्ञमुखम् त्रिवृत् त्रिवृद् यज्ञमुख मेवैव यज्ञमुखम् त्रिवृत् त्रिवृद् यज्ञमुख मेव ।

(21)[P16] 5.3.4.1(16)- त्रिवृत् ।

त्रिवृदिति त्रि - वृत् ।

(22)[P16] 5.3.4.1(17)- यज्ञमुखम् । एव । पुरस्तात् ।

यज्ञमुख मेवैव यज्ञमुखं यँज्ञमुख मेव पुरस्तात् पुरस्ता देव यज्ञमुखं यँज्ञमुख मेव पुरस्तात् ।

(23)[P16] 5.3.4.1(17)- यज्ञमुखम् ।

यज्ञमुखमिति यज्ञ - मुखम् ।

(24)[P16] 5.3.4.1(18)- एव । पुरस्तात् । वि ।

एव पुरस्तात् पुरस्ता देवैव पुरस्ताद् वि वि पुरस्ता देवैव पुरस्ताद् वि ।

(25)[P16] 5.3.4.1(19)- पुरस्तात् । वि । यातयति ।

पुरस्ताद् वि वि पुरस्तात् पुरस्ताद् वि यातयति यातयति वि पुरस्तात् पुरस्ताद् वि यातयति ।

(26)[P16] 5.3.4.1(20)– वि । यातयति । नृचक्षसाम् ।

वि यातयति यातयति वि वि यातयति नृचक्षसाम् नृचक्षसांँ यातयति वि वि यातयति नृचक्षसाम् ।

(27)[P16] 5.3.4.1(21)– यातयति । नृचक्षसाम् । भागः ।

यातयति नृचक्षसाम् नृचक्षसांँ यातयति यातयति नृचक्षसाम् भागो भागो नृचक्षसांँ यातयति यातयति नृचक्षसाम् भागः ।

(28)[P16] 5.3.4.1(22)– नृचक्षसाम् । भागः । असि ।

नृचक्षसाम् भागो भागो नृचक्षसाम् नृचक्षसाम् भागो ऽस्यसि भागो नृचक्षसाम् नृचक्षसाम् भागो ऽसि ।

(29)[P16] 5.3.4.1(22)– नृचक्षसाम् ।

नृचक्षसामिति नृ – चक्षसाम् ।

(30)[P16] 5.3.4.1(23)– भागः । असि । इति ।

भागो ऽस्यसि भागो भागो ऽसीती त्यसि भागो भागो ऽसीति ।

(31)[P16] 5.3.4.1(24)– असि । इति । दक्षिणतः ।

असीती त्यस्य सीति दक्षिणतो दक्षिणत इत्यस्य सीति दक्षिणतः ।

(32)[P16] 5.3.4.1(25)– इति । दक्षिणतः । शुश्रुवा(ग्म्)सः ।

इति दक्षिणतो दक्षिणत इतीति दक्षिणतः शुश्रुवा(ग्म्)सः शुश्रुवा(ग्म्)सो दक्षिणत इतीति दक्षिणतः शुश्रुवा(ग्म्)सः ।

(33)[P16] 5.3.4.1(26)– दक्षिणतः । शुश्रुवा(ग्म्)सः । वै ।

दक्षिणतः शुश्रुवा(ग्म्)सः शुश्रुवा(ग्म्)सो दक्षिणतो दक्षिणतः शुश्रुवा(ग्म्)सो वै वै शुश्रुवा(ग्म्)सो दक्षिणतो दक्षिणतः शुश्रुवा(ग्म्)सो वै ।

(34)[P16] 5.3.4.1(27)- शुश्रुवा(ग्म्)सः । वै । नृचक्षसः ।

शुश्रुवा(ग्म्)सो वै वै शुश्रुवा(ग्म्)सः शुश्रुवा(ग्म्)सो वै नृचक्षसो नृचक्षसो वै शुश्रुवा(ग्म्)सः शुश्रुवा(ग्म्)सो वै नृचक्षसः ।

(35)[P16] 5.3.4.1(28)- वै । नृचक्षसः । अन्नम् ।

वै नृचक्षसो नृचक्षसो वै वै नृचक्षसो ऽन्न मन्नम् नृचक्षसो वै वै नृचक्षसो ऽन्नम् ।

(36)[P16] 5.3.4.1(29)- नृचक्षसः । अन्नम् । धाता ।

नृचक्षसो ऽन्न मन्नन् नृचक्षसो नृचक्षसो ऽन्नम् धाता धाता ऽन्नम् नृचक्षसो नृचक्षसो ऽन्नम् धाता ।

(37)[P16] 5.3.4.1(29)- नृचक्षसः ।

नृचक्षस इति नृ - चक्षसः ।

(38)[P16] 5.3.4.1(30)- अन्नम् । धाता । जाताय ।

अन्नम् धाता धाता ऽन्न मन्नम् धाता जाताय जाताय धाता ऽन्न मन्नम् धाता जाताय ।

(39)[P16] 5.3.4.1(31)- धाता । जाताय । एव ।

धाता जाताय जाताय धाता धाता जातायैवैव जाताय धाता धाता जातायैव ।

(40)[P16] 5.3.4.1(32)- जाताय । एव । अस्मै ।

जातायैवैव जाताय जाता यैवास्मा अस्मा एव जाताय जातायैवास्मै ।

(41)[P16] 5.3.4.1(33)- एव । अस्मै । अन्नम् ।

एवास्मा अस्मा एवै वास्मा अन्न मन्न मस्मा एवै वास्मा अन्नम् ।

(42)[P16] 5.3.4.1(34)- अस्मै । अन्नम् । अपि ।

अस्मा अन्न मन्न मस्मा अस्मा अन्न मप्य प्यन्न मस्मा अस्मा अन्न मपि ।

(43)[P16] 5.3.4.1(35)- अन्न᳚म् । अपि॑ । द॒धा॒ति॒ ।

अ॒न्न म॒प्य प्य॒न्न म॒न्न मपि॑ दधाति दधा॒ त्यप्य॒न्न म॒न्न मपि॑ दधाति ।

(44)[P16] 5.3.4.1(36)- अपि॑ । द॒धा॒ति॒ । तस्मा᳚त् ।

अपि॑ दधाति दधा॒ त्यप्यपि॑ दधाति॒ तस्मा॒त् तस्मा᳚द् दधा॒ त्यप्यपि॑ दधाति॒ तस्मा᳚त् ।

(45)[P16] 5.3.4.1(37)- द॒धा॒ति॒ । तस्मा᳚त् । जा॒तः ।

द॒धा॒ति॒ तस्मा॒त् तस्मा᳚द् दधाति दधाति॒ तस्मा᳚ज् जा॒तो जा॒त स्तस्मा᳚द् दधाति दधाति॒ तस्मा᳚ज् जा॒तः ।

(46)[P16] 5.3.4.1(38)- तस्मा᳚त् । जा॒तः । अन्न᳚म् ।

तस्मा᳚ज् जा॒तो जा॒त स्तस्मा॒त् तस्मा᳚ज् जा॒तो ऽन्न॒ मन्न॑म् जा॒त स्तस्मा॒त् तस्मा᳚ज् जा॒तो ऽन्न᳚म् ।

(47)[P16] 5.3.4.1(39)- जा॒तः । अन्न᳚म् । अ॒त्ति॒ ।

जा॒तो ऽन्न॒ मन्न॑म् जा॒तो जा॒तो ऽन्न॑ मत्त्य॒ त्यन्न॑म् जा॒तो जा॒तो ऽन्न॑ मत्ति ।

(48)[P16] 5.3.4.1(40)- अन्न᳚म् । अ॒त्ति॒ । ज॒नित्र᳚म् ।

अन्न॑ मत्त्य॒ त्यन्न॒ मन्न॑ मत्ति ज॒नित्र॑म् ज॒नित्र॑ म॒त्त्यन्न॒ मन्न॑ मत्ति ज॒नित्र᳚म् ।

(49)[P16] 5.3.4.1(41)- अ॒त्ति॒ । ज॒नित्र᳚म् । स्पृ॒तम् ।

अ॒त्ति॒ ज॒नित्र॑म् ज॒नित्र॑ मत्त्यत्ति ज॒नित्र(ग्ग्)॑ स्पृ॒त(ग्ग्) स्पृ॒तम् ज॒नित्र॑ मत्त्यत्ति ज॒नित्र(ग्ग्)॑ स्पृ॒तम् ।

(50)[P16] 5.3.4.1(42)- ज॒नित्र᳚म् । स्पृ॒तम् । स॒प्त॒द॒शः ।

ज॒नित्र(ग्ग्)॑ स्पृ॒त(ग्ग्) स्पृ॒तम् ज॒नित्र॑म् ज॒नित्र(ग्ग्)॑ स्पृ॒त(ग्म्) स॑प्तद॒शः स॑प्तद॒शः स्पृ॒तम् ज॒नित्र॑म् ज॒नित्र(ग्ग्)॑ स्पृ॒त(ग्म्) स॑प्तद॒शः ।

(51)[P16] 5.3.4.1(43)– स्पृतम् । सप्तदशः । स्तोमः ।

स्पृत(ग्म्) सप्तदशः सप्तदशः स्पृत(ग्ग्) स्पृत(ग्म्) सप्तदशः स्तोमः स्तोमः सप्तदशः स्पृत(ग्ग्) स्पृत(ग्म्) सप्तदशः स्तोमः ।

(52)[P16] 5.3.4.1(44)– सप्तदशः । स्तोमः । इति ।

सप्तदशः स्तोमः स्तोमः सप्तदशः सप्तदशः स्तोम इतीति स्तोमः सप्तदशः सप्तदशः स्तोम इति ।

(53)[P16] 5.3.4.1(44)– सप्तदशः ।

सप्तदश इति सप्त – दशः ।

(54)[P16] 5.3.4.1(45)– स्तोमः । इति । आह ।

स्तोम इतीति स्तोमः स्तोम इत्या हाहेति स्तोमः स्तोम इत्याह ।

(55)[P16] 5.3.4.1(46)– इति । आह । अन्नम् ।

इत्या हाहेतीत्या हान्न मन्न माहेती त्याहान्नम् ।

(56)[P16] 5.3.4.1(47)– आह । अन्नम् । वै ।

आहान्न मन्न माहाहान्नं ँवै वा अन्न माहाहान्नं ँवै ।

(57)[P16] 5.3.4.1(48)– अन्नम् । वै । जनित्रम् ।

अन्नं ँवै वा अन्न मन्नं ँवै जनित्रम् जनित्रं ँवा अन्न मन्नं ँवै जनित्रम् ।

(58)[P16] 5.3.4.1(49)– वै । जनित्रम् । अन्नम् ।

वै जनित्रम् जनित्रं ँवै वै जनित्र मन्न मन्नम् जनित्रं ँवै वै जनित्र मन्नम् ।

(59)[P16] 5.3.4.1(50)– जनित्रम् । अन्नम् । सप्तदशः ।

जनित्र मन्न मन्नम् जनित्रम् जनित्र मन्न(ग्म्) सप्तदशः सप्तदशो ऽन्नम् जनित्रम् जनित्र मन्न(ग्म्) सप्तदशः ।

(1)[P17] 5.3.4.2(1)- अन्नम् । सप्तदशः । अन्नम् ।

अन्न(ग्म्) सप्तदशः सप्तदशो ऽन्न मन्न(ग्म्) सप्तदशो ऽन्न मन्न(ग्म्) सप्तदशो ऽन्न मन्न(ग्म्) सप्तदशो ऽन्नम् ।

(2)[P17] 5.3.4.2(2)- सप्तदशः । अन्नम् । एव ।

सप्तदशो ऽन्न मन्न(ग्म्) सप्तदशः सप्तदशो ऽन्न मेवै वान्न(ग्म्) सप्तदशः सप्तदशो ऽन्न मेव ।

(3)[P17] 5.3.4.2(2)- सप्तदशः ।

सप्तदश इति सप्त - दशः ।

(4)[P17] 5.3.4.2(3)- अन्नम् । एव । दक्षिणतः ।

अन्न मेवै वान्न मन्न मेव दक्षिणतो दक्षिणत एवान्न मन्न मेव दक्षिणतः ।

(5)[P17] 5.3.4.2(4)- एव । दक्षिणतः । धत्ते ।

एव दक्षिणतो दक्षिणत एवैव दक्षिणतो धत्ते धत्ते दक्षिणत एवैव दक्षिणतो धत्ते ।

(6)[P17] 5.3.4.2(5)- दक्षिणतः । धत्ते । तस्मात् ।

दक्षिणतो धत्ते धत्ते दक्षिणतो दक्षिणतो धत्ते तस्मात् तस्माद् धत्ते दक्षिणतो दक्षिणतो धत्ते तस्मात् ।

(7)[P17] 5.3.4.2(6)- धत्ते । तस्मात् । दक्षिणेन ।

धत्ते तस्मात् तस्माद् धत्ते धत्ते तस्माद् दक्षिणेन दक्षिणेन तस्माद् धत्ते धत्ते तस्माद् दक्षिणेन ।

(8)[P17] 5.3.4.2(7)- तस्मात् । दक्षिणेन । अन्नम् ।

तस्माद् दक्षिणेन दक्षिणेन तस्मात् तस्माद् दक्षिणे नान्न मन्नम् दक्षिणेन तस्मात् तस्माद् दक्षिणे नान्नम् ।

(9)[P17] 5.3.4.2(8)- दक्षिणेन । अन्नम् । अद्यते ।

दक्षिणे नान्न मन्नम् दक्षिणेन दक्षिणे नान्न मद्यते ऽद्यते ऽन्नम् दक्षिणेन दक्षिणे नान्न मद्यते ।

(10)[P17] 5.3.4.2(9)- अन्नम् । अद्यते । मित्रस्य ।

अन्न मद्यते ऽद्यते ऽन्न मन्न मद्यते मित्रस्य मित्रस्या द्यते ऽन्न मन्न मद्यते मित्रस्य ।

(11)[P17] 5.3.4.2(10)- अद्यते । मित्रस्य । भागः ।

अद्यते मित्रस्य मित्रस्या द्यते ऽद्यते मित्रस्य भागो भागो मित्रस्या द्यते ऽद्यते मित्रस्य भागः ।

(12)[P17] 5.3.4.2(11)- मित्रस्य । भागः । असि ।

मित्रस्य भागो भागो मित्रस्य मित्रस्य भागो ऽस्यसि भागो मित्रस्य मित्रस्य भागो ऽसि ।

(13)[P17] 5.3.4.2(12)- भागः । असि । इति ।

भागो ऽस्यसि भागो भागो ऽसीती त्यसि भागो भागो ऽसीति ।

(14)[P17] 5.3.4.2(13)- असि । इति । पश्चात् ।

असीती त्यस्यसीति पश्चात् पश्चा दित्यस्य सीति पश्चात् ।

(15)[P17] 5.3.4.2(14)- इति । पश्चात् । प्राणः ।

इति पश्चात् पश्चा दितीति पश्चात् प्राणः प्राणः पश्चा दितीति पश्चात् प्राणः ।

(16)[P17] 5.3.4.2(15)- पश्चात् । प्राणः । वै ।

पश्चात् प्राणः प्राणः पश्चात् पश्चात् प्राणो वै वै प्राणः पश्चात् पश्चात् प्राणो वै ।

(17)[P17] 5.3.4.2(16)- प्राणः । वै । मित्रः ।

प्राणो वै वै प्राणः प्राणो वै मित्रो मित्रो वै प्राणः प्राणो वै मित्रः ।

(18)[P17] 5.3.4.2(16)- प्राणः ।

प्राण इति प्र - अनः ।

(19)[P17] 5.3.4.2(17)– वै । मित्रः । अपानः ।

वै मित्रो मित्रो वै वै मित्रो ऽपानो ऽपानो मित्रो वै वै मित्रो ऽपानः ।

(20)[P17] 5.3.4.2(18)– मित्रः । अपानः । वरुणः ।

मित्रो ऽपानो ऽपानो मित्रो मित्रो ऽपानो वरुणो वरुणो ऽपानो मित्रो मित्रो ऽपानो वरुणः ।

(21)[P17] 5.3.4.2(19)– अपानः । वरुणः । प्राणापानौ ।

अपानो वरुणो वरुणो ऽपानो ऽपानो वरुणः प्राणापानौ प्राणापानौ वरुणो ऽपानो ऽपानो वरुणः प्राणापानौ ।

(22)[P17] 5.3.4.2(19)– अपानः ।

अपान इत्यप – अनः ।

(23)[P17] 5.3.4.2(20)– वरुणः । प्राणापानौ । एव ।

वरुणः प्राणापानौ प्राणापानौ वरुणो वरुणः प्राणापाना वेवैव प्राणापानौ वरुणो वरुणः प्राणापाना वेव ।

(24)[P17] 5.3.4.2(21)– प्राणापानौ । एव । अस्मिन्न् ।

प्राणापाना वेवैव प्राणापानौ प्राणापाना वेवास्मिन् नस्मिन् नेव प्राणापानौ प्राणापाना वेवास्मिन्न् ।

(25)[P17] 5.3.4.2(21)– प्राणापानौ ।

प्राणापानाविति प्राण – अपानौ ।

(26)[P17] 5.3.4.2(22)– एव । अस्मिन्न् । दधाति ।

एवास्मिन् नस्मिन् नेवै वास्मिन् दधाति दधा त्यस्मिन् नेवै वास्मिन् दधाति ।

(27)[P17] 5.3.4.2(23)– अस्मिन्न् । दधाति । दिवः ।

अस्मिन् दधाति दधा त्यस्मिन् नस्मिन् दधाति दिवो दिवो दधा त्यस्मिन् नस्मिन् दधाति दिवः ।

(28)[P17] 5.3.4.2(24)– दधाति । दिवः । वृष्टिः ।

दधाति दिवो दिवो दधाति दधाति दिवो वृष्टिर् वृष्टिर् दिवो दधाति दधाति दिवो वृष्टिः ।

(29)[P17] 5.3.4.2(25)– दिवः । वृष्टिः । वाताः ।

दिवो वृष्टिर् वृष्टिर् दिवो दिवो वृष्टिर् वाता वाता वृष्टिर् दिवो दिवो वृष्टिर् वाताः ।

(30)[P17] 5.3.4.2(26)– वृष्टिः । वाताः । स्पृताः ।

वृष्टिर् वाता वाता वृष्टिर् वृष्टिर् वाताः स्पृताः स्पृता वाता वृष्टिर् वृष्टिर् वाताः स्पृताः ।

(31)[P17] 5.3.4.2(27)– वाताः । स्पृताः । एकवि(ग्म्)शः ।

वाताः स्पृताः स्पृता वाता वाताः स्पृता एकवि(ग्म्)श एकवि(ग्म्)शः स्पृता वाता वाताः स्पृता एकवि(ग्म्)शः ।

(32)[P17] 5.3.4.2(28)– स्पृताः । एकवि(ग्म्)शः । स्तोमः ।

स्पृता एकवि(ग्म्)श एकवि(ग्म्)शः स्पृताः स्पृता एकवि(ग्म्)शः स्तोमः स्तोम एकवि(ग्म्)शः स्पृताः स्पृता एकवि(ग्म्)शः स्तोमः ।

(33)[P17] 5.3.4.2(29)– एकवि(ग्म्)शः । स्तोमः । इति ।

एकवि(ग्म्)शः स्तोमः स्तोम एकवि(ग्म्)श एकवि(ग्म्)शः स्तोम इतीति स्तोम एकवि(ग्म्)श एकवि(ग्म्)शः स्तोम इति ।

(34)[P17] 5.3.4.2(29)– एकवि(ग्म्)शः ।

एकवि(ग्म्)श इत्येक – वि(ग्म्)शः ।

(35)[P17] 5.3.4.2(30)– स्तोमः । इति । आह ।

स्तोम इतीति स्तोमः स्तोम इत्याहाहेति स्तोमः स्तोम इत्याह ।

(36)[P17] 5.3.4.2(31)– इति । आह । प्रतिष्ठा ।

इत्या हाहेतीत्याह प्रतिष्ठा प्रतिष्ठा ऽऽहेतीत्याह प्रतिष्ठा ।

(37)[P17] 5.3.4.2(32)– आह । प्रतिष्ठा । वै ।

आह प्रतिष्ठा प्रतिष्ठा ऽऽहाह प्रतिष्ठा वै वै प्रतिष्ठा ऽऽहाह प्रतिष्ठा वै ।

(38)[P17] 5.3.4.2(33)– प्रतिष्ठा । वै । एकवि(ग्म्)शः ।

प्रतिष्ठा वै वै प्रतिष्ठा प्रतिष्ठा वा एकवि(ग्म्)श एकवि(ग्म्)शो वै प्रतिष्ठा प्रतिष्ठा वा एकवि(ग्म्)शः ।

(39)[P17] 5.3.4.2(33)– प्रतिष्ठा ।

प्रतिष्ठेति प्रति – स्था ।

(40)[P17] 5.3.4.2(34)– वै । एकवि(ग्म्)शः । प्रतिष्ठित्यै ।

वा एकवि(ग्म्)श एकवि(ग्म्)शो वै वा एकवि(ग्म्)शः प्रतिष्ठित्यै प्रतिष्ठित्या एकवि(ग्म्)शो वै वा एकवि(ग्म्)शः प्रतिष्ठित्यै ।

(41)[P17] 5.3.4.2(35)– एकवि(ग्म्)शः । प्रतिष्ठित्यै । इन्द्रस्य ।

एकवि(ग्म्)शः प्रतिष्ठित्यै प्रतिष्ठित्या एकवि(ग्म्)श एकवि(ग्म्)शः प्रतिष्ठित्या इन्द्र स्येन्द्रस्य प्रतिष्ठित्या एकवि(ग्म्)श एकवि(ग्म्)शः प्रतिष्ठित्या इन्द्रस्य ।

(42)[P17] 5.3.4.2(35)– एकवि(ग्म्)शः ।

एकवि(ग्म्)श इत्येक – वि(ग्म्)शः ।

(43)[P17] 5.3.4.2(36)– प्रतिष्ठित्यै । इन्द्रस्य । भागः ।

प्रतिष्ठित्या इन्द्र स्येन्द्रस्य प्रतिष्ठित्यै प्रतिष्ठित्या इन्द्रस्य भागो भाग इन्द्रस्य प्रतिष्ठित्यै प्रतिष्ठित्या इन्द्रस्य भागः ।

(44)[P17] 5.3.4.2(36)– प्रतिष्ठित्यै ।

प्रतिष्ठित्या इति प्रति – स्थित्यै ।

(45)[P17] 5.3.4.2(37)– इन्द्रस्य । भागः । असि ।

इन्द्रस्य भागो भाग इन्द्र स्येन्द्रस्य भागो ऽस्यसि भाग इन्द्र स्येन्द्रस्य भागो ऽसि ।

(46)[P17] 5.3.4.2(38)– भागः । असि । इति ।

भागो ऽस्यसि भागो भागो ऽसीती त्यसि भागो भागो ऽसीति ।

(47)[P17] 5.3.4.2(39)– असि । इति । उत्तरतः ।

असीती त्यस्यसी त्युत्तरत उत्तरत इत्यस्यसी त्युत्तरतः ।

(48)[P17] 5.3.4.2(40)– इति । उत्तरतः । ओजः ।

इत्युत्तरत उत्तरत इती त्युत्तरत ओज ओज उत्तरत इती त्युत्तरत ओजः ।

(49)[P17] 5.3.4.2(41)– उत्तरतः । ओजः । वै ।

उत्तरत ओज ओज उत्तरत उत्तरत ओजो वै वा ओज उत्तरत उत्तरत ओजो वै ।

(50)[P17] 5.3.4.2(41)– उत्तरतः ।

उत्तरत इत्युत् – तरतः ।

(51)[P17] 5.3.4.2(42)– ओजः । वै । इन्द्रः ।

ओजो वै वा ओज ओजो वा इन्द्र इन्द्रो वा ओज ओजो वा इन्द्रः ।

(52)[P17] 5.3.4.2(43)– वै । इन्द्रः । ओजः ।

वा इन्द्र इन्द्रो वै वा इन्द्र ओज ओज इन्द्रो वै वा इन्द्र ओजः ।

(53)[P17] 5.3.4.2(44)– इन्द्रः । ओजः । विष्णुः ।

इन्द्र ओज ओज इन्द्र इन्द्र ओजो विष्णुर् विष्णु रोज इन्द्र इन्द्र ओजो विष्णुः ।

(54)[P17] 5.3.4.2(45)– ओजः । विष्णुः । ओजः ।

ओजो विष्णुर् विष्णु रोज ओजो विष्णु रोज ओजो विष्णु रोज ओजो विष्णु रोजः ।

(55)[P17] 5.3.4.2(46)– विष्णुः । ओजः । क्षत्रम् ।

विष्णु रोज ओजो विष्णुर् विष्णु रोजः क्षत्रम् क्षत्र मोजो विष्णुर् विष्णु रोजः क्षत्रम् ।

(56)[P17] 5.3.4.2(47)– ओजः । क्षत्रम् । ओजः ।

ओजः क्षत्रम् क्षत्र मोज ओजः क्षत्र मोज ओजः क्षत्र मोज ओजः क्षत्र मोजः ।

(57)[P17] 5.3.4.2(48)– क्षत्रम् । ओजः । पञ्चदशः ।

क्षत्र मोज ओजः क्षत्रम् क्षत्र मोजः पञ्चदशः पञ्चदश ओजः क्षत्रम् क्षत्र मोजः पञ्चदशः ।

(58)[P17] 5.3.4.2(49)– ओजः । पञ्चदशः । ओजः ।

ओजः पञ्चदशः पञ्चदश ओज ओजः पञ्चदश ओज ओजः पञ्चदश ओज ओजः पञ्चदश ओजः ।

(59)[P17] 5.3.4.2(50)– पञ्चदशः । ओजः । एव ।

पञ्चदश ओज ओजः पञ्चदशः पञ्चदश ओज एवै वौजः पञ्चदशः पञ्चदश ओज एव ।

(60)[P17] 5.3.4.2(50)– पञ्चदशः ।

पञ्चदश इति पञ्च – दशः ।

(1)[P18] 5.3.4.3(1)– ओजः । एव । उत्तरतः ।

ओज एवै वौज ओज एवो त्तरत उत्तरत एवौज ओज एवो त्तरतः ।

(2)[P18] 5.3.4.3(2)- एव । उत्तरतः । धत्ते ।

एवोत्तरत उत्तरत एवैवोत्तरतो धत्ते धत्त उत्तरत एवैवोत्तरतो धत्ते ।

(3)[P18] 5.3.4.3(3)- उत्तरतः । धत्ते । तस्मात् ।

उत्तरतो धत्ते धत्त उत्तरत उत्तरतो धत्ते तस्मात् तस्माद् धत्त उत्तरत उत्तरतो धत्ते तस्मात् ।

(4)[P18] 5.3.4.3(3)- उत्तरतः ।

उत्तरत इत्युत् - तरतः ।

(5)[P18] 5.3.4.3(4)- धत्ते । तस्मात् । उत्तरतोभिप्रयायी ।

धत्ते तस्मात् तस्माद् धत्ते धत्ते तस्मा दुत्तरतोभिप्रया य्युत्तरतोभिप्रयायी तस्माद् धत्ते धत्ते तस्मा दुत्तरतोभिप्रयायी ।

(6)[P18] 5.3.4.3(5)- तस्मात् । उत्तरतोभिप्रयायी । जयति ।

तस्मा दुत्तरतोभिप्रया य्युत्तरतोभिप्रयायी तस्मात् तस्मा दुत्तरतोभिप्रयायी जयति जय त्युत्तरतोभिप्रयायी तस्मात् तस्मा दुत्तरतोभिप्रयायी जयति ।

(7)[P18] 5.3.4.3(6)- उत्तरतोभिप्रयायी । जयति । वसूनाम् ।

उत्तरतोभिप्रयायी जयति जय त्युत्तरतोभिप्रया य्युत्तरतोभिप्रयायी जयति वसूनां ँवसूनाम् जय त्युत्तरतोभिप्रया य्युत्तरतोभिप्रयायी जयति वसूनाम् ।

(8)[P18] 5.3.4.3(6)- उत्तरतोभिप्रयायी ।

उत्तरतोभिप्रयायीत्युत्तरतः - अभिप्रयायी ।

(9)[P18] 5.3.4.3(7)- जयति । वसूनाम् । भागः ।

जयति वसूनां ँवसूनाम् जयति जयति वसूनाम् भागो भागो वसूनाम् जयति जयति वसूनाम् भागः ।

(10)[P18] 5.3.4.3(8)– वसूनाम् । भागः । असि ।

वसूनाम् भागो भागो वसूनां ँवसूनाम् भागो ऽस्यसि भागो वसूनां ँवसूनाम् भागो ऽसि ।

(11)[P18] 5.3.4.3(9)– भागः । असि । इति ।

भागो ऽस्यसि भागो भागो ऽसीती त्यसि भागो भागो ऽसीति ।

(12)[P18] 5.3.4.3(10)– असि । इति । पुरस्तात् ।

असीती त्यस्य सीति पुरस्तात् पुरस्ता दित्यस्य सीति पुरस्तात् ।

(13)[P18] 5.3.4.3(11)– इति । पुरस्तात् । उप ।

इति पुरस्तात् पुरस्ता दितीति पुरस्ता दुपोप पुरस्ता दितीति पुरस्ता दुप ।

(14)[P18] 5.3.4.3(12)– पुरस्तात् । उप । दधाति ।

पुरस्ता दुपोप पुरस्तात् पुरस्ता दुप दधाति दधा त्युप पुरस्तात् पुरस्ता दुप दधाति ।

(15)[P18] 5.3.4.3(13)– उप । दधाति । यज्ञमुखम् ।

उप दधाति दधा त्युपोप दधाति यज्ञमुखं ँयज्ञमुखम् दधा त्युपोप दधाति यज्ञमुखम् ।

(16)[P18] 5.3.4.3(14)– दधाति । यज्ञमुखम् । वै ।

दधाति यज्ञमुखं ँयज्ञमुखम् दधाति दधाति यज्ञमुखं ँवै वै यज्ञमुखम् दधाति दधाति यज्ञमुखं ँवै ।

(17)[P18] 5.3.4.3(15)– यज्ञमुखम् । वै । वसवः ।

यज्ञमुखं ँवै वै यज्ञमुखं ँयज्ञमुखं ँवै वसवो वसवो वै यज्ञमुखं ँयज्ञमुखं ँवै वसवः ।

(18)[P18] 5.3.4.3(15)– यज्ञमुखम् ।

यज्ञमुखमिति यज्ञ – मुखम् ।

(19)[P18] 5.3.4.3(16)– वै । वसवः । यज्ञमुखम् ।

वै वसवो वसवो वै वै वसवो यज्ञमुखं ँयज्ञमुखं ँवसवो वै वै वसवो यज्ञमुखम् ।

(20)[P18] 5.3.4.3(17)– वसवः । यज्ञमुखम् । रुद्राः ।

वसवो यज्ञमुखं ँयज्ञमुखं ँवसवो वसवो यज्ञमुख(ग्म्) रुद्रा रुद्रा यज्ञमुखं ँवसवो वसवो यज्ञमुख(ग्म्) रुद्राः ।

(21)[P18] 5.3.4.3(18)– यज्ञमुखम् । रुद्राः । यज्ञमुखम् ।

यज्ञमुख(ग्म्) रुद्रा रुद्रा यज्ञमुखं ँयज्ञमुख(ग्म्) रुद्रा यज्ञमुखं ँयज्ञमुख(ग्म्) रुद्रा यज्ञमुखं ँयज्ञमुख(ग्म्) रुद्रा यज्ञमुखम् ।

(22)[P18] 5.3.4.3(18)– यज्ञमुखम् ।

यज्ञमुखमिति यज्ञ – मुखम् ।

(23)[P18] 5.3.4.3(19)– रुद्राः । यज्ञमुखम् । चतुर्वि(ग्म्)शः ।

रुद्रा यज्ञमुखं ँयज्ञमुख(ग्म्) रुद्रा रुद्रा यज्ञमुखम् चतुर्वि(ग्म्)श श्चतुर्वि(ग्म्)शो यज्ञमुख(ग्म्) रुद्रा रुद्रा यज्ञमुखम् चतुर्वि(ग्म्)शः ।

(24)[P18] 5.3.4.3(20)– यज्ञमुखम् । चतुर्वि(ग्म्)शः । यज्ञमुखम् ।

यज्ञमुखम् चतुर्वि(ग्म्)श श्चतुर्वि(ग्म्)शो यज्ञमुखं ँयज्ञमुखम् चतुर्वि(ग्म्)शो यज्ञमुखं ँयज्ञमुखम् चतुर्वि(ग्म्)शो यज्ञमुखं ँयज्ञमुखम् चतुर्वि(ग्म्)शो यज्ञमुखम् ।

(25)[P18] 5.3.4.3(20)– यज्ञमुखम् ।

यज्ञमुखमिति यज्ञ – मुखम् ।

(26)[P18] 5.3.4.3(21)– चतुर्वि(ग्म्)शः । यज्ञमुखम् । एव ।

चतुर्वि(ग्म्)शो यज्ञमुखं ँयज्ञमुखम् चतुर्वि(ग्म्)श श्चतुर्वि(ग्म्)शो यज्ञमुख मेवैव यज्ञमुखम् चतुर्वि(ग्म्)श श्चतुर्वि(ग्म्)शो यज्ञमुख मेव ।

(27)[P18] 5.3.4.3(21)– चतुर्वि(ग्म्)शः ।

चतुर्वि(ग्म्)श इति चतुः – वि(ग्म्)शः ।

(28)[P18] 5.3.4.3(22)– यज्ञमुखम् । एव । पुरस्तात् ।

यज्ञमुख मेवैव यज्ञमुखं ँयज्ञमुख मेव पुरस्तात् पुरस्ता देव यज्ञमुखं ँयज्ञमुख मेव पुरस्तात् ।

(29)[P18] 5.3.4.3(22)– यज्ञमुखम् ।

यज्ञमुखमिति यज्ञ – मुखम् ।

(30)[P18] 5.3.4.3(23)– एव । पुरस्तात् । वि ।

एव पुरस्तात् पुरस्ता देवैव पुरस्ताद् वि वि पुरस्ता देवैव पुरस्ताद् वि ।

(31)[P18] 5.3.4.3(24)– पुरस्तात् । वि । यातयति ।

पुरस्ताद् वि वि पुरस्तात् पुरस्ताद् वि यातयति यातयति वि पुरस्तात् पुरस्ताद् वि यातयति ।

(32)[P18] 5.3.4.3(25)– वि । यातयति । आदित्यानाम् ।

वि यातयति यातयति वि वि यातय त्यादित्याना मादित्यानां ँयातयति वि वि यातय त्यादित्यानाम् ।

(33)[P18] 5.3.4.3(26)– यातयति । आदित्यानाम् । भागः ।

यातय त्यादित्याना मादित्यानां ँयातयति यातय त्यादित्यानाम् भागो भाग आदित्यानां ँयातयति यातय त्यादित्यानाम् भागः ।

(34)[P18] 5.3.4.3(27)– आदित्यानाम् । भागः । असि ।

आदित्यानाम् भागो भाग आदित्याना मादित्यानाम् भागो ऽस्यसि भाग आदित्याना मादित्यानाम् भागो ऽसि ।

(35)[P18] 5.3.4.3(28)– भागः । असि । इति ।

भागो ऽस्यसि भागो भागो ऽसीती त्यसि भागो भागो ऽसीति ।

(36)[P18] 5.3.4.3(29)- असि । इति । दक्षिणतः ।

असीती त्यस्य सीति दक्षिणतो दक्षिणत इत्यस्य सीति दक्षिणतः ।

(37)[P18] 5.3.4.3(30)- इति । दक्षिणतः । अन्नम् ।

इति दक्षिणतो दक्षिणत इतीति दक्षिणतो ऽन्न मन्नम् दक्षिणत इतीति दक्षिणतो ऽन्नम् ।

(38)[P18] 5.3.4.3(31)- दक्षिणतः । अन्नम् । वै ।

दक्षिणतो ऽन्न मन्नम् दक्षिणतो दक्षिणतो ऽन्नं वै वा अन्नम् दक्षिणतो दक्षिणतो ऽन्नं वै ।

(39)[P18] 5.3.4.3(32)- अन्नम् । वै । आदित्याः ।

अन्नं वै वा अन्न मन्नं वा आदित्या आदित्या वा अन्न मन्नं वा आदित्याः ।

(40)[P18] 5.3.4.3(33)- वै । आदित्याः । अन्नम् ।

वा आदित्या आदित्या वै वा आदित्या अन्न मन्न मादित्या वै वा आदित्या अन्नम् ।

(41)[P18] 5.3.4.3(34)- आदित्याः । अन्नम् । मरुतः ।

आदित्या अन्न मन्न मादित्या आदित्या अन्नम् मरुतो मरुतो ऽन्न मादित्या आदित्या अन्नम् मरुतः ।

(42)[P18] 5.3.4.3(35)- अन्नम् । मरुतः । अन्नम् ।

अन्नम् मरुतो मरुतो ऽन्न मन्नम् मरुतो ऽन्न मन्नम् मरुतो ऽन्न मन्नम् मरुतो ऽन्नम् ।

(43)[P18] 5.3.4.3(36)- मरुतः । अन्नम् । गर्भाः ।

मरुतो ऽन्न मन्नम् मरुतो मरुतो ऽन्नम् गर्भा गर्भा अन्नम् मरुतो मरुतो ऽन्नम् गर्भाः ।

(44)[P18] 5.3.4.3(37)- अन्नम् । गर्भाः । अन्नम् ।

अन्नम् गर्भा गर्भा अन्न मन्नम् गर्भा अन्न मन्नम् गर्भा अन्न मन्नम् गर्भा अन्नम् ।

(45)[P18] 5.3.4.3(38)- गर्भाः । अन्नम् । पञ्चवि(ग्म्)शः ।

गर्भा अन्न मन्नम् गर्भा गर्भा अन्नम् पञ्चवि(ग्म्)शः पञ्चवि(ग्म्)शो ऽन्नम् गर्भा गर्भा अन्नम् पञ्चवि(ग्म्)शः ।

(46)[P18] 5.3.4.3(39)- अन्नम् । पञ्चवि(ग्म्)शः । अन्नम् ।

अन्नम् पञ्चवि(ग्म्)शः पञ्चवि(ग्म्)शो ऽन्न मन्नम् पञ्चवि(ग्म्)शो ऽन्न मन्नम् पञ्चवि(ग्म्)शो ऽन्न मन्नम् पञ्चवि(ग्म्)शो ऽन्नम् ।

(47)[P18] 5.3.4.3(40)- पञ्चवि(ग्म्)शः । अन्नम् । एव ।

पञ्चवि(ग्म्)शो ऽन्न मन्नम् पञ्चवि(ग्म्)शः पञ्चवि(ग्म्)शो ऽन्न मेवै वान्नम् पञ्चवि(ग्म्)शः पञ्चवि(ग्म्)शो ऽन्नमेव ।

(48)[P18] 5.3.4.3(40)- पञ्चवि(ग्म्)शः ।

पञ्चवि(ग्म्)श इति पञ्च - वि(ग्म्)शः ।

(49)[P18] 5.3.4.3(41)- अन्नम् । एव । दक्षिणतः ।

अन्न मेवै वान्न मन्न मेव दक्षिणतो दक्षिणत एवान्न मन्न मेव दक्षिणतः ।

(50)[P18] 5.3.4.3(42)- एव । दक्षिणतः । धत्ते ।

एव दक्षिणतो दक्षिणत एवैव दक्षिणतो धत्ते धत्ते दक्षिणत एवैव दक्षिणतो धत्ते ।

(51)[P18] 5.3.4.3(43)- दक्षिणतः । धत्ते । तस्मात् ।

दक्षिणतो धत्ते धत्ते दक्षिणतो दक्षिणतो धत्ते तस्मात् तस्माद् धत्ते दक्षिणतो दक्षिणतो धत्ते तस्मात् ।

(52)[P18] 5.3.4.3(44)- धत्ते । तस्मात् । दक्षिणेन ।

धत्ते तस्मात् तस्माद् धत्ते धत्ते तस्माद् दक्षिणेन दक्षिणेन तस्माद् धत्ते धत्ते तस्माद् दक्षिणेन ।

(53)[P18] 5.3.4.3(45)- तस्मात् । दक्षिणेन । अन्नम् ।

तस्माद् दक्षिणेन दक्षिणेन तस्मात् तस्माद् दक्षिणे नान्न मन्नम् दक्षिणेन तस्मात् तस्माद् दक्षिणे नान्नम् ।

(54)[P18] 5.3.4.3(46)- दक्षिणेन । अन्नम् । अद्यते ।

दक्षिणे नान्न मन्नम् दक्षिणेन दक्षिणे नान्न मद्यते ऽद्यते ऽन्नम् दक्षिणेन दक्षिणे नान्न मद्यते ।

(55)[P18] 5.3.4.3(47)- अन्नम् । अद्यते । अदित्यै ।

अन्न मद्यते ऽद्यते ऽन्न मन्न मद्यते ऽदित्या अदित्या अद्यते ऽन्न मन्न मद्यते ऽदित्यै ।

(56)[P18] 5.3.4.3(48)- अद्यते । अदित्यै । भागः ।

अद्यते ऽदित्या अदित्या अद्यते ऽद्यते ऽदित्यै भागो भागो ऽदित्या अद्यते ऽद्यते ऽदित्यै भागः ।

(57)[P18] 5.3.4.3(49)- अदित्यै । भागः । असि ।

अदित्यै भागो भागो ऽदित्या अदित्यै भागो ऽस्यसि भागो ऽदित्या अदित्यै भागो ऽसि ।

(58)[P18] 5.3.4.3(50)- भागः । असि । इति ।

भागो ऽस्यसि भागो भागो ऽसीती त्यसि भागो भागो ऽसीति ।

(1)[P19] 5.3.4.4(1)- असि । इति । पश्चात् ।

असीती त्यस्य सीति पश्चात् पश्चा दित्यस्य सीति पश्चात् ।

(2)[P19] 5.3.4.4(2)- इति । पश्चात् । प्रतिष्ठा ।

इति पश्चात् पश्चा दितीति पश्चात् प्रतिष्ठा प्रतिष्ठा पश्चा दितीति पश्चात् प्रतिष्ठा ।

(3)[P19] 5.3.4.4(3)– पश्चात् । प्रतिष्ठा । वै ।

पश्चात् प्रतिष्ठा प्रतिष्ठा पश्चात् पश्चात् प्रतिष्ठा वै वै प्रतिष्ठा पश्चात् पश्चात् प्रतिष्ठा वै ।

(4)[P19] 5.3.4.4(4)– प्रतिष्ठा । वै । अदितिः ।

प्रतिष्ठा वै वै प्रतिष्ठा प्रतिष्ठा वा अदिति रदितिर् वै प्रतिष्ठा प्रतिष्ठा वा अदितिः ।

(5)[P19] 5.3.4.4(4)– प्रतिष्ठा ।

प्रतिष्ठेति प्रति – स्था ।

(6)[P19] 5.3.4.4(5)– वै । अदितिः । प्रतिष्ठा ।

वा अदिति रदितिर् वै वा अदितिः प्रतिष्ठा प्रतिष्ठा ऽदितिर् वै वा अदितिः प्रतिष्ठा ।

(7)[P19] 5.3.4.4(6)– अदितिः । प्रतिष्ठा । पूषा ।

अदितिः प्रतिष्ठा प्रतिष्ठा ऽदिति रदितिः प्रतिष्ठा पूषा पूषा प्रतिष्ठा ऽदिति रदितिः प्रतिष्ठा पूषा ।

(8)[P19] 5.3.4.4(7)– प्रतिष्ठा । पूषा । प्रतिष्ठा ।

प्रतिष्ठा पूषा पूषा प्रतिष्ठा प्रतिष्ठा पूषा प्रतिष्ठा प्रतिष्ठा पूषा प्रतिष्ठा प्रतिष्ठा पूषा प्रतिष्ठा ।

(9)[P19] 5.3.4.4(7)– प्रतिष्ठा ।

प्रतिष्ठेति प्रति – स्था ।

(10)[P19] 5.3.4.4(8)– पूषा । प्रतिष्ठा । त्रिणवः ।

पूषा प्रतिष्ठा प्रतिष्ठा पूषा पूषा प्रतिष्ठा त्रिणव स्त्रिणवः प्रतिष्ठा पूषा पूषा प्रतिष्ठा त्रिणवः ।

(11)[P19] 5.3.4.4(9)– प्रतिष्ठा । त्रिणवः । प्रतिष्ठित्यै ।

प्रतिष्ठा त्रिणव स्त्रिणवः प्रतिष्ठा प्रतिष्ठा त्रिणवः प्रतिष्ठित्यै प्रतिष्ठित्यै त्रिणवः प्रतिष्ठा प्रतिष्ठा त्रिणवः प्रतिष्ठित्यै ।

(12)[P19] 5.3.4.4(9)– प्रतिष्ठा ।

प्रतिष्ठेति प्रति – स्था ।

(13)[P19] 5.3.4.4(10)– त्रिणवः । प्रतिष्ठित्यै । देवस्य ।

त्रिणवः प्रतिष्ठित्यै प्रतिष्ठित्यै त्रिणव स्त्रिणवः प्रतिष्ठित्यै देवस्य देवस्य प्रतिष्ठित्यै त्रिणव स्त्रिणवः प्रतिष्ठित्यै देवस्य ।

(14)[P19] 5.3.4.4(10)– त्रिणवः ।

त्रिणव इति त्रि – नवः ।

(15)[P19] 5.3.4.4(11)– प्रतिष्ठित्यै । देवस्य । सवितुः ।

प्रतिष्ठित्यै देवस्य देवस्य प्रतिष्ठित्यै प्रतिष्ठित्यै देवस्य सवितुः सवितुर् देवस्य प्रतिष्ठित्यै प्रतिष्ठित्यै देवस्य सवितुः ।

(16)[P19] 5.3.4.4(11)– प्रतिष्ठित्यै ।

प्रतिष्ठित्या इति प्रति – स्थित्यै ।

(17)[P19] 5.3.4.4(12)– देवस्य । सवितुः । भागः ।

देवस्य सवितुः सवितुर् देवस्य देवस्य सवितुर् भागो भागः सवितुर् देवस्य देवस्य सवितुर् भागः ।

(18)[P19] 5.3.4.4(13)– सवितुः । भागः । असि ।

सवितुर् भागो भागः सवितुः सवितुर् भागो ऽस्यसि भागः सवितुः सवितुर् भागो ऽसि ।

(19)[P19] 5.3.4.4(14)– भागः । असि । इति ।

भागो ऽस्यसि भागो भागो ऽसीतीत्यसि भागो भागो ऽसीति ।

(20)[P19] 5.3.4.4(15)– असि । इति । उत्तरतः ।

असीती त्यस्यसी त्युत्तरत उत्तरत इत्यस्यसी त्युत्तरतः ।

(21)[P19] 5.3.4.4(16)– इति । उत्तरतः । ब्रह्म ।

इत्युत्तरत उत्तरत इती त्युत्तरतो ब्रह्म ब्रह्मो त्तरत इती त्युत्तरतो ब्रह्म ।

(22)[P19] 5.3.4.4(17)– उत्तरतः । ब्रह्म । वै ।

उत्तरतो ब्रह्म ब्रह्मो त्तरत उत्तरतो ब्रह्म वै वै ब्रह्मो त्तरत उत्तरतो ब्रह्म वै ।

(23)[P19] 5.3.4.4(17)– उत्तरतः ।

उत्तरत इत्युत् – तरतः ।

(24)[P19] 5.3.4.4(18)– ब्रह्म । वै । देवः ।

ब्रह्म वै वै ब्रह्म ब्रह्म वै देवो देवो वै ब्रह्म ब्रह्म वै देवः ।

(25)[P19] 5.3.4.4(19)– वै । देवः । सविता ।

वै देवो देवो वै वै देवः सविता सविता देवो वै वै देवः सविता ।

(26)[P19] 5.3.4.4(20)– देवः । सविता । ब्रह्म ।

